***भवतामिष्टतमस्य पद्यांशस्य आस्वादन टीकां लिखत।***

वत्सलात्मजो मातुः कुतुकादेकं चूत-
स्तबकं धृत्वाह्लादादन्तिकं सम्प्राप्तवान्।
रुषया मातावदत् फुल्लितं गुच्छं शिशो
लीलया त्वया खल भञ्जितं कष्टं कष्टम्।।



मातुः वत्सलः पुत्रः कौतुकेन चूतादेकं स्तबकं संगृह्य आह्लादेन मातुः समीपमागतवान्। परं बालकस्य कृत्यमिदं दृष्ट्वा माता क्रोधेन बालकं तर्जितवती। कार्यमिदं बाल्यभावे ममाप्यनुभवसिद्धमेव कविना प्रोक्तम्। अत्र बालभावस्य स्वाभाविकं कृत्यं मातुः प्रतिकरणञ्च तन्मयत्वेन कविना प्रकाशितमिति मम इष्टतमः पद्यांशः अयम्।

